रोर्वा षः । गर्हायाम् अमरः ६ब० । अयत्नम् । असम-र्थे त्रिका० ।

दुः(दुस्स)सह त्रि० दुःखेन सह्यतेऽसौ सह–खल् वा रोः षः । १दुःखेन सोढव्ये "यो दुःसहासो वसुधा" ऋ० ६।८।१५ "तेषामापततां वेगः करिणां दुःसहोऽभवत्" भा०व०६५अ० "दुःसहेन हृदये निशाचरी" रघुः "भव-त्यनिष्टादपि नाम दुःसहात्" कुमा० । २नागदमन्यां स्त्री राजनि० । [भावे क्त । २दुष्टे स्वप्ने न० ।

दुःषु(सु)प्त त्रि० दुर्+स्वप–क्त–वा षत्वम् । १दुष्टस्वप्नयुक्ते

दुःषूति त्रि० दुष्टा सूतिः रोर्वा षः । दुष्टायां सूतौ ।

दुः(दुष्षि)षेध त्रि० दुर्–सिध–खल् सुषामा० षत्वे रोर्वा षः । सेद्धुमसाध्ये । [दुष्टसक्थियुक्ते ।

दुःसक्थ(क्थि) त्रि० दुष्टं सक्थि यस्य वा अच् समा० ।

दुःसाध(ध्य) त्रि० दुःखेन साध्यतेऽसौ खल् तदर्थे घञ् वा । साधयितुमशक्ये "छन्दोनुवृत्तिदुःसाधा" माघः "किं नाम मम दुःसाध्यं मत्कृपा निग्रहे रणे" हरिवं० २६७अ०

दुःसाधिन् त्रि० दुष्टं साधयति साधि–णिनि । १दुष्टसाधके २दौवारिके पु० शब्दमाला ।

दुः(दु)स्त्री स्त्री दुष्टा स्त्री प्रा०स० वा विसर्गलोपः । दुष्टायां स्त्रियां तस्याभावः कर्म वा अण् । दौस्त्रीण तस्याभावे कर्मणि च न० ।

दुः(दु)स्थ त्रि० दुष्टं तिष्ठति स्था–क वा विसर्गलोपः । १दुर्गते २मूर्खे ३दुष्टं स्थिते च मेदि० ४लुब्धे शब्दार्थचि० । "दुःस्थं तिष्ठसि यच्च पथ्यमधुना कर्त्तास्मि तत् श्रोष्यसि" अमरुश० ।

दुः(दु)स्पर्श त्रि० दुःखेन स्पृश्यतेऽसौ दुर्+स्पृश–कर्मणि खल् वा विसर्गलोपः । १स्प्रष्टुमशक्ये मेदि० । "दुर्ग्राह्यो मुष्टिना वायुः दुस्पर्शः पाणिना शशी" भा०आनु०२२अ० २दुरालभायाम् स्त्री अमरः ३लताकरञ्जे राजनि० ४क-पिकच्छ्वाम् ५आकाशवल्ल्यां ६कण्टकार्य्याम् च स्त्री रा-जनि० । [१कर्मणि खल् । २दुष्टे व्रणे च अस्वादौ हेमच० ।

दुः(दु)स्फोट पु० दुष्टं स्फोटयति स्फुट–अच् वा विसर्गलोपः ।

दुःस्वप्न पु० दुष्टः स्वप्नः प्रा०स० । अशुभसूचके स्वप्नभेदे स च छान्दोग्यो० "अथ स्वप्ने कृष्णदन्तं पुरुषं पश्यति सएनं हन्ति" इत्युक्तः ।

कतिचित् दुःस्वप्नभेदाश्च ब्रह्मवैवर्तजन्मख० उक्ता यथा "सर्वं श्रुतं महाभाग ! दुःस्वप्नं कथय प्रभो ! । उवाच तच्च भगवान् ! श्रूयतामिति तद्वचः । श्रीभगवानुवाच स्वप्ने हसति यो हर्षाद्विवाहं यदि पश्यति । नर्त्तनं गीतमिष्टञ्च विपत्तिस्तस्य निश्चितम् । दन्ता यस्य विपी-ड्यन्ते विचरन्तञ्च पश्यति । धनहानिर्भवेत्तस्य पीडा चापि शरीरजा । अभ्यङ्गितस्तु तैलेन यो गच्छेद्दक्षिणां दिशम् । खरोष्ट्रमहिषारूढो मृत्युस्तस्य न संशयः । स्वप्ने चूर्णं जवापुष्पमशोकं करवीरकम् । विपत्ति-स्तस्य तैलञ्च लवणं यदि पश्यति । नग्नां कृष्णां छिन्न-नासां शूद्रस्य विधवां तथा । कपर्द्दकं तालफलं दृष्ट्वा शोकमवाप्नुयात् । स्वप्ने रुष्टं ब्राह्मणञ्च ब्राह्मणीं कोप-संयुताम् । विपत्तिश्च भवेत्तस्य लक्ष्मीर्याति स्वहाद्ध्रु-वम् । वनपुष्पं रक्तवर्णं पलाशञ्च सुपुष्पितम् । का-र्पासं रक्तवस्त्रं च दृष्ट्वा दुःखमवाप्नुयात् । गायन्तीञ्च हसन्तीं वा कृष्णाम्बरधरां स्त्रियम् । दृष्ट्वा कृष्णाञ्च विधवां नरो मृत्युमवाप्नुयात् । देवता यत्र नृत्यन्ति गायन्ति च हसन्ति च । आस्फोटयन्ति धावन्ति तस्य देशो विन-श्यति । वान्तं मूत्रं पुरीषञ्च रौप्यं रत्नं सुवर्णकम् । प्रत्यक्षमथ वा स्वप्ने जीवितं दशमासिकम् । कृष्णाम्बर-धरां नारीं कृष्णमाल्यानुलेपनाम् । उपगूहति यः स्वप्ने तस्य मृत्युर्भविष्यति । मृतवत्सञ्च सुप्तञ्च मृगस्य वानरस्य वा । यः प्राप्नोत्यस्थिमालां च विपत्तिस्तस्य निश्चितम् । अभ्यङ्गितस्तु तैलेन हविषा मधुनाऽपि वा । तक्रेणैव गुडेनापि पीडा तस्य विनिश्चितम् । पतितं नखकेशञ्च निर्वाणाङ्गारमेव च । भस्मपूर्णां चितां दृष्ट्वा लभते मृत्युमेव च । मसीञ्च किञ्चित् कृष्णं वा दृष्ट्वा दुःखं लभेद्ध्रुवम् । पादुकाफलकं रक्तपुष्पमाल्यं भयानकम् । माषं मसूरं मुद्गं वा दृष्ट्वा सद्यो व्रणं भवेत् । करटं शरटं काकं भल्लूकं वानरं परम् । पूयगात्रमलं स्वप्ने केवलं व्याधिकारणम् । भग्नभाण्डं क्षतं शूद्रं यक्ष्मत्कुष्ठस्य रोगिणम् । रक्ताम्बरञ्च जटिलं शूकरं महिषं खरम् । कृष्णाकारं महाघोरं मृत-जीवं भयङ्करम् । दृष्ट्वा स्वप्ने योनिलिङ्गं विपत्तिं लभते ध्रुवम् । कुवेशरूपं म्लेच्छञ्च यमदूतं भयङ्करम् । पाश-हस्तं पाशशस्त्रं दृष्ट्वा मृत्युं लभेन्नरः । ब्राह्मणो ब्राह्मणी बाला बालको वा सुतः सुता । विदार्यं कुरुते कोपात् दृष्ट्वा दुःखमवाप्नुयात् । कृष्णपुष्पञ्च तन्माल्यं शस्त्रश-स्त्रास्त्रधारिणम् । म्लेच्छाञ्च विकृताकारां दृष्ट्वा मृत्युं लभेद्ध्रुवम् । नाटयञ्च नर्त्तनं गीतं गायनं रक्तवास-सम् । मृदङ्गवाद्यमानन्दं दृष्ट्वा दुःखं लभेद्ध्रुवम् ।